Pending Record 11 of 126
CAN YOU SUPPLY ? YES NO COND FUTUREDATE
ILL: 338727 :Borrower: MNU :ReqDate: 20041111 :NeedBefore: 20041211
:Status: IN PROCESS 20041116 :OCLC: 1754710 :DueDate:
:Source: OCLCILL :Lender: UIU,NUI,EYM,*CUY,CUY
CALLNO:
TITLE: The Journal of Oriental research, Madras.
IMPRINT: Madras, India : Kuppuswami Sastri Research Institute, Mylapore,
ARTICLE: T R Chintamani: Sumantu Dharmasutra :PAGES: 75-88
VOL: 8 :NO: 1 :DATE: 1934
VERIFIED: <TN:11896><ODYSSEY:216.54.119.91/ILL>OCLC ISSN: 0022-3301 [Format: Serial]
PHOTOCOPY
PATRON: Lohar, Dasharath
SHIP TO: ILL/110 Wilson Library/University of Minnesota/309 19th Avenue South/ Minneapolis, MN 55455 :BILL TO: same/ ARL,CIC,RLG:
SHIP VIA: Library Rate :MAXCOST: $30IFM :COPYRT COMPLIANCE: CCL
FAX: 612-624-4254
E-MAIL: wilsill@tc.umn.edu / ARIEL: 160.94.230.141
BILLING NOTES: FEIN #41-6007513
AFFILIATION: PALS Libraries please ship via MINITEX.
LENDING CHARGES: SHIPPED: :LENDING RESTRICTIONS:
LENDING NOTES: NOV 19 2004
RETURN TO:
RETURN VIA: B 3 574 351

Main PK 101. J68

ARIEL 10p

Page 25 of 135

INTERLIBRARY SERVICES
133 DOE LIBRARY
UNIVERSITY OF CALIFORNIA
BERKELEY, CALIFORNIA 94720

Photocopy Supplied by
NORTHERN REGIONAL LIBRARY FACILITY
University of California
510 / 232 / 7767
Fax: 510 / 233-0455

9 pp
NRLF

NOV 1 8 2004

Quarterly Vol. VIII, Part I

THE JOURNAL OF ORIENTAL RESEARCH MADRAS

January–March 1934

तमसो मा ज्योतिर्गमय

MADRAS
PRINTED AT THE MADRAS LAW JOURNAL PRESS, MYLAPORE
1934

Annual subscription Inland Rs. 6 Foreign 10 sh.

Anukaraṇa or Imitation as much as possible and tries to secure maximum similarity, Sādṛśya. He says. "What I have not said here, must be taken from the world; therefore, the world is the authority or 'proof' for dramatic presentation; therefore the world must be made the source, the proof, the authority and the measure for valuation of success by those doing Nāṭya."

"एतेऽभिनयविशेषाः कर्तव्याः सत्त्वभावयुक्ताः स्युः ।
अन्येऽपि लौकिका ये ते सर्वे लोकतः साध्याः ॥
नानाविधैर्यथा पुष्पैः माल्यं प्रथ्नाति माल्यकृत् ।
अङ्गोपाङ्गरसैर्भावैः तथा नाट्यं प्रयोजयेत् ॥

....

एवमेते मया प्रोक्ताः वागङ्गाभिनयाः क्रमात् ।
नोक्ता ये च मया तत्र लोकात् ग्राह्यास्तु ते बुधैः ॥
लोको वेदास्तथाध्यात्म प्रमाणं त्रिविधं स्मृतम् ।

....

लोकसिद्धं भवेत् सिद्धं नाट्यं लोकस्वभावजम् ।
तस्मान्नाट्यप्रयोगे तु प्रमाणं लोक इष्यते ॥

....

न हि शक्यं हि लोकस्य स्थावरस्य चरस्य च ।
शास्त्रेण निर्णयं कर्तुं भावचेष्टाविधिं प्रति ॥
नानाशीलाः प्रकृतयः शीले नाट्यं प्रतिष्ठितम् ।
तस्माल्लोकः प्रमाणं हि कर्तव्यं नाट्ययोक्तृभिः ॥

N. S. XXVI, 108-120.

Requestors must comply with
Copyright law (Title 17 U.S. Code)

SUMANTU DHARMASŪTRA

BY

T. R. CHINTAMANI, M.A., PH.D.,
Senior Lecturer in Sanskrit,
University of Madras.

The name of Sumantu, as an authority on Dharma appears first in the work of Paiṭhīnasi, a Dharmasūtrakāra, whose work is no longer extant. The citation from Paiṭhīnasi is as follows :—

सुमन्तुः कश्यपो बभ्रुः पैठीनो व्याघ्र एव च ।
....
इति धर्मप्रणेतारः षट्त्रिंशदृषयः स्मृताः ॥[1]

Mādhava refers in his Parāśara Mādhavīya to the Aśvamedhaparvan of the Mahābhārata where Sumantu is regarded as one of the oldest Smartās. The same passage, with few alterations appears in the Vṛddha Gautamasmṛti also. In the Viṣṇudharmottarapurāṇa Sumantu is referred to as a Smartā in the following passage :—

सौमन्ता जैमिनीयाश्च पुलस्त्यस्य महात्मनः ।[2]

The Bhāgavata purāṇa refers to Sumantu as a son of Jaimini[3] and as one of the promulgators of the Atharva Veda.[4] The Śāntiparva of the Mahābhārata gives us the additional information that Sumantu was one of the pupils of Vyāsa.

On the other hand Yājñavalkya who mentions several writers on Smṛti does not refer to Sumantu. Similarly Śaṅkha who gives a list of writers on Smṛti does not mention Sumantu.[5] In one of the citations which is given below, Sumantu is seen to

1. Smṛticandrikā, Saṁskāra p. 2.
   Parāśara Mādhavīya, Vol. I, pt. i, p. 108.
2. Chapter 146.
3. Skandha XII-vi-75.
4. Skandha XII-vii-1.
5. Smṛticandrikā, Saṁskāra p. 2.

refer to Aṅgiras. This is in agreement with the extract from Aṅgiras found in the Smṛticandrikā[1] where the name of Sumantu does not occur. In another of the verses of Sumantu, quoted by Aparārka[2] and others, Sumantu is seen referring to Śaṅkha also and this too is in agreement with the omission of Sumantu in Śaṅkha's list. From these it is possible to infer that Sumantu was a comparatively old writer but later than Yājñavalkya and others.

The earliest digest (*i.e.*) that of Viśvarūpa quotes profusely from Sumantu and from that date to the 19th century we find several writers extracting from Sumantu. The citations are prose passages some times and metrical stanzas, mostly in the anuṣṭup. The metrical citations have not been referred to in the following pages.

A prose work called Sumantu Dharmasūtra is deposited in the G. O. Mss. Library,[3] Madras, and many of the prose citations in the name of Sumantu in Dharmaśāstra nibandhas are found in this work. There are a few that could not be traced. In the following passages the text of the Sumantu Dharmasūtra as found in the ms. is given with footnotes indicating the differences in the reading of the sūtras as found in nibandhas. Such of the prose citations as are not found in the ms. but which are cited in digests on Dharmaśāstra are given in an appendix.

1. Saṁskāra, p. 2.
2. Aparāka, I, 223.
3. R. No. 3457.

॥ सुमन्तुधर्मसूत्रम् ॥

अथातः सुमन्तुधर्मं व्याख्यास्यामः ॥ १ ॥

धर्मज्ञसमयः प्रमाणं वेदाश्च ॥ २ ॥

वेदवेदाङ्गेतिहासपुराणकुलगणजातिदेशपाषण्डाश्रमश्रोत्रियधर्मकर्मव्यवस्था-प्रवर्तकानामेतेषां तु धर्मकर्मव्यभिचारात् संस्कारो न भवति ॥ ३ ॥

तस्मात्तन्निवृत्त्यर्थमिदं शास्त्रं व्याख्यास्यामः ॥ ४ ॥

ब्राह्मणक्षत्रियवैश्यानां प्रवृत्तिकानां गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्म-नामकरणोपनिष्क्रामणान्नप्राशनचौलोपनयनव्रतचर्याध्ययनसमावर्तनविवाहयज्ञदाना-दीनि[1] ॥ ५ ॥

यजनयाजनाध्ययनाध्यापनप्रदानप्रतिग्रहं चेति ब्राह्मणवृत्तिः ॥ ६ ॥

यजनमध्ययनं प्रजापालनं [चेति[2]] वृत्तिः राजन्यस्य ॥ ७ ॥

यजनमध्ययनं दानं कृषिः पशुपालनं वाणिज्यानि पोषणं प्रश्चि [?] प्रयोगश्चेति वैश्यस्य ॥ ८ ॥

त्रयाणां वर्णानां शुश्रूषेति शूद्रस्य ॥ ९ ॥

दशैकादशद्वाशरात्रयः ब्राह्मणक्षत्रियवैश्यानां मरणेष्वाशौचम् ॥ १० ॥

न शूद्रस्याधिकारो न प्रतिषेधः ॥ ११ ॥

स्त्री [?] दशाहोरात्रमित्येके ॥ १२ ॥

प्रतिभूतं तु यः शूद्रो ब्राह्मणो ज्ञानदुर्बलः ।
नीयन्तमनुगच्छेत त्रिरात्रमशुचिर्भवेत् ॥ १३ ॥
त्रिरात्रे तु ततः पूर्णे नदीं गत्वा समुद्रगाम् ।
प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति ॥ १४ ॥
विनिवृत्ता यदा शूद्रा उदकान्त उपस्पृशाः ।
तदा पश्यन्ति ये विप्रा इति धर्मविदोऽब्रुवन् ॥ १४ ॥

1. ब्राह्मणक्षत्रियवैश्यानां गर्भाधानसीमन्तोन्नयनजातकर्मनामकरणान्नप्राशनचूडो-पनयनव्रतचर्याध्ययनसमावर्तनविवाहयज्ञदानानि समानानि ।
Vīramitrodaya Saṁskāra Prakāśa, p. 134.
2. The words within brackets are omitted in the ms.

चण्डालैश्च[श्चैव] गोभिश्च विप्रैरात्महतस्य च ।
न विधिर्न च संस्कारो नाशौचं नोदकक्रिया ॥ १६ ॥

भृग्वग्निजलसंग्रामेषु देशान्तरिते नाशकेऽन्त्यजातगोब्राह्मणगुर्वर्थहतानां सद्यः शौचम् ॥ १७ ॥[1]

अनुदकमूत्रपुरीषकरणके रुधिरप्राशने च एकरात्रोपवासश्च घृतकुशहिरण्योदकप्राशनं च ॥ १८ ॥[2]

गर्भमासतुल्यानि गर्भस्रंसने शुद्धिः ॥ १९ ॥

त्रिवर्षादूर्ध्वं संस्कारादर्वाग्वर्षप्रमाणमाशौचं दीक्षितऋत्विग्ब्रह्मचारिणः अशौचम् [?] ॥ २० ॥

लशुनं जनपलण्डुकुम्भीकः [?] श्राद्धसूतकाः ॥ २१ ॥[3]

न मधुमांसमूत्रपुरीषरेतोऽमेध्यभक्षणे गायत्र्यष्टसहस्रं जपेत् ॥ २२ ॥

प्रभोजनाद्यरञ्ज्ञी [?] अपिक्षी [?] प्रतिषिद्धभोजने ॥ २३ ॥

तथान्नपानेऽपि च ॥ २४ ॥

---

1. Aparārka reads this sūtra :—

भृग्वग्निजलसंग्रामदेशान्तरसंस्थसंन्यास्यनशनाशनिमहाध्वनिकानां उदकक्रिया कार्या सद्यः शौचं भवति । III, 21.

Hāralatā too reads in the same way with this difference—संन्यास्यनशनि—p. 115.

The reading in the Gadādharapaddhati is :—

अग्निजलसंग्रामदेशान्तरस्थसन्यास्यनमहाध्वनिकानाम् उदकदानं कार्यम् ।
Kālasāra, p. 312.

2. Another reading is :—

अनुदकमूत्रपुरीषकरणे नखकेशरुधिरप्राशने सद्यः स्नानं घृतकुशाहिरण्योदकप्राशनं च । Vīramitrodaya, Āhnikaprakāśa, p. 213.
Gadādharapaddhati—Ācārasāra, p. 244.

Aparārka reads as in the Vīramitrodaya but omits अनु. . .रणे III, 289.

3. Aparārka reads :—

लशुनपलाण्डुगृञ्जनकुम्भीकश्राद्धसूतिकाभोज्यान्नमधुमांसमूत्ररेतोऽमेध्याभक्ष्यभक्षणे सावित्र्यष्टसहस्रं मूर्ध्नि संपातानावयेत् । III, 289.

Mādhava reads :—

लशुनपलाण्डुगृञ्जनभक्षणे सावित्र्यष्टसहस्रेण मूर्ध्नि संपातान्नयेत् ॥
Parāśara Mādhavīya, Vol. II, pt. i, p. 402.

मृतसूतकयोः प्रवृत्तेऽपि च वातकोपमे द्विजस्य गायत्र्यष्टसहस्रं जपेत् ॥ २५ ॥

श्ववानरसिंहमूषिकप्लवगसृगालनखदंष्ट्रानाम [?] भारिवार्धुषिकतस्कराणां भिन्नभाजनभिन्नभाण्डभक्तानां भोजने प्राजापत्यम् आपोहिष्ठीभिः स्नानं प्राणायामत्रयं च गायत्र्यष्टसहस्रं च ॥ २६ ॥

अथ कनकमणिरजतशङ्खशुक्त्यब्दोपलानां त्रिः परिमार्जनं शुद्धिः ॥२७॥

वस्त्रविदलरज्जुविदलचर्मणाम् अद्भिः प्रक्षालनं प्रोक्षणं च ॥ २८ ॥

भूम्यस्थिकाष्ठानां तक्षणम् ॥ २९ ॥

मृत्पात्राणामग्निनोत्तापनम् ॥ ३० ॥

चण्डालसूतिकपतितोदक्याशवस्पर्शने त्यागः ॥ ३२ ॥

सीसकत्रपुकांस्यताम्ररूप्यानामुदकभस्मभिः परिमार्जनं शुद्धिः ॥ ३२ ॥

गोपलैः [?] पत्रफलानां रज्जुपुष्पाणाम् अद्भिरेव ॥ ३३ ॥

एकशफाष्टसन्धीनां क्षीरप्राशने गोमहिषाजाविकानाम् अनिर्देहप्राशने त्रिरात्रं त्रिषवणस्नानं च ॥ ३४ ॥

कलविङ्कप्लव [?] चक्रवाकहंसचाषभासक्रौञ्चकूरकाककङ्कगृध्रश्येनवलौकमल्गुटिट्टिभखञ्जरीटोलूकरक्तपादादिमांसभक्षणे वधे च गायत्र्यष्टसहस्रं जपेत् ॥ ३५ ॥

गोघ्नस्य सशिखं वपनं सचेलोपगाहनं पञ्चगव्यप्राशनं गोष्ठे शयनं च दशरात्रमुदकतर्पणमुपस्पर्शनं गवामनुगमनं च । ऋषभैकादश गावो दक्षिणा ॥ ३६ ॥[1]

सृगालनकुलमार्जारमयूरखरमतङ्गकुञ्जराणां वधे प्राजापत्यं चरेत् । हिरण्यं दक्षिणा ॥ ३७ ॥

सर्पवराहमण्डूकवधे यथासङ्ख्यं लोहदण्डं घृतकुम्भं पलालभारम् ॥ ३८ ॥

गोधाशलभशल्यकमत्स्यकूर्मशिशुमाराणां वधे प्राजापत्यं चरेत् ॥ ३९ ॥

---

1. Viśvarūpa reads:—

गोघ्नस्य गोष्ठे शयनं द्वादशरात्रं पञ्चगव्यभोजनं गवामनुगमनं च ।
III, 265.

Aparārka reads :—

गोघ्नस्य गोप्रदानं द्वादशरात्रं पञ्चगव्यप्राशनम् उदकतर्पणोपस्पर्शने गवामनुगमनं च ।
III, 265.

यूकमत्कुणपूतीकलिथमातृवाहकशजलूककण्डूषवाहकानां वधे प्राणायाम एकः ॥ ४० ॥[1]

अशुच्यवेक्षणे सूर्यदर्शनम् ॥ ४१ ॥

श्वपाकसंभावेषु एषणे ब्राह्मण्यादिव्यवहारः ॥ ४२ ॥

बिडालनकुलकाकानां तूच्छिष्टभक्षणे त्रिरात्रोपवासः ॥ ४३ ॥

विड्वराहकपिकाकगोमायूनां पुरीषभक्षणे चान्द्रायणेन शुद्धिः ॥ ४४ ॥

असनोत्र[?]शवस्पर्शने कृच्छ्रपादः ॥ ४५ ॥

अगम्यागमने स्त्रीवधचाण्डालसंयोगेषु कृच्छ्रत्रयं षष्टिं गवां दद्यात् ॥४६॥

उक्त्वेन सादे छेदे [?] स्पर्शनदर्शनेषु मांसभैक्षाहारः स्नानं त्रिषवणं च धेनुर्दक्षिणा ॥ ४७ ॥

मातृष्वसृस्नुषाभगिनीभागिनेयीचण्डालीनामभिगमने तप्तकृच्छ्रं गोसहस्रं दद्यात् ॥ ४८ ॥

मातुलसुतामातृष्वसृगोत्रापौ [?] समानेष्टायां [?] विवाह्य चान्द्रायणं चरेत् ॥ ४९ ॥[2]

गोब्राह्मणशरीरे रुधिरमुत्पाद्य उदकवासं कुर्यात् ॥ ५० ॥

उष्ट्रयानं समारुह्य खरयानं सकामतः ।

स्नात्वा च विप्रो दिग्वासाः प्राणायामेन शुध्यति ॥ ५१ ॥

---

1. Aparārka reads :—

यूकामषकमाक्षिकामत्कुणपूतिकीटमातृवाहकजलौकगण्डूपदादीनाम् अन्येषां वानस्थिमतां वधे प्राणायामः । अस्थिमतां वधे पणो देयः । वृक्षादीनां छेदने ऋचां शतं जप्यम् । III, 276.

2. Aparārka reads :—

मातुलसुतां पैतृष्वसेयीं समानार्षगोत्रां च चान्द्रायणं चरेत् । परित्यज्यैनां बिभृयात् । I, 53.

Mādhava reads :—

पितृष्वसृसुतां मातुलसुतां मातृसगोत्रां समानार्षेयीं च विवाह्य चान्द्रायणं चरेत् । परित्यज्य चैनां बिभृयात् । Vol. II, pt. i, p. 337.

Mitramiśra reads as Mādhava does, but omits मातृसगोत्रां (Yānjñ. Vyā.) p. 112, C. S. S.

The same writer reads in the Vīramitrodaya as follows:—

पितृष्वसृसुतां मातृष्वसृसुतां मातृसगोत्रां तथैव च समानप्रवरां विवाह्य चान्द्रायणं चरेत् । Saṁskāra Pra., p. 683 and 715.

ब्रह्महसुरापसुवर्णस्तेयगुरुतल्पगानां महापातकिनां वक्ष्यमाणः ॥ ५२ ॥[1]

ब्रह्महा द्वादश वर्षाणि कृच्छ्रं चरेत् । अधश्शायी स्वकर्माचक्षाणो भिक्षाहारो दिव्यनदीपुलिनसङ्गमेऽष्टाश्रमपर्वतप्रस्रवणतपोवनविहारी स्यात् । द्वादशवर्षेषु पूर्णेषु हिरण्यमणिगोवृषतिलभूमिसर्पींषि ब्राह्मणेभ्यो दद्यात् पूतो भवति । तेषामेवाश्वमेधावभृथस्नानेन वा सद्यः शौचमिच्छति ॥ ५३ ॥[2]

सुरापस्य समुद्रादुद्धृतस्नानं गायत्र्याः शतसाहस्रं वा तेनाभिमन्त्र्य शिरसि गोसहस्रं दद्यात् पूतो भवति ॥ ५४ ॥[3]

---

1. Viśvarūpa reads :—

ब्रह्महसुरापगुरुतल्पगसुवर्णस्तेयिनां महापातकिनां वक्ष्यामः प्रायश्चित्तम् । III, 237.

2. Viśvarūpa reads :—

ब्रह्महा संवत्सरं कृच्छ्रं चरेत् अधश्शायी [1]स्वकर्माचक्षाणो भैक्षाहारो दिव्यनदीपुलिनशायी[2] सद्ग्रामाश्रमगोष्ठपर्वतप्रस्रवणतपोवनविहारी स्यात्[3] संवत्सरे पूर्णे हिरण्यमणिगोवृषान्नतिल[4]भूमिसर्पींषि ब्राह्मणेभ्यो दत्त्वा[5] पूतो भवति अश्वमेधावभृथ-स्नानेन वा सद्यः । * III, 237.

After this sūtra Viśvarūpa adds :—

यश्चैतैः सह यौनमुख्यब्राह्मणानां संबन्धानामन्यतमेन संपर्कं कुर्यात् तस्याप्येतदेव प्रायश्चितं विदध्यात् । III, 257.

3. Viśvarūpa reads :—

सुरापस्य प्रायश्चित्तं षण्मासं वृतसमुद्रोकैः स्नानं सावित्र्या दशसहस्रसंपातः शिरस्यन्ते सान्तपनं सर्वकृच्छ्रेण शुद्धो भवति । III, 250.

Aparāka and Mādhava read :—

ब्राह्मणस्य सुरापस्य षण्मासानुद्धृतसमुद्रोदकस्नानम् । सावित्र्यष्टसहस्रं जुहुयात् प्रत्यहं त्रिरात्रमुपवासः तप्तकृच्छ्रेण च पूतो भवति अश्वमेधावभृथस्नानेन ।

Aparārka, III, 254.

Parāśara Mādhavīya, Vol. II, pt. ii, p. 83.

---

*Mādhava has the following differences :—

Parāśara Mādhavīya, Vol. II, pt. ii, p. 72.

१. कर्मावेदको
२. omit शायी
३. add स्थानवीरासनी
४. गोधान्यतिल
५. ददन्

सुवर्णस्तेयी तु गायत्र्याः शतसहस्रम् आज्याहुतीर्हुत्वा दशरात्रमुपवासश्च तैः सह वसतिमाप्नोति ॥ ५५ ॥[1]

गुरुदाराभिगामी संवत्सरचारी कण्टकिनीं शाखां परिष्वज्य स्वकर्माचक्षाणो भैक्षाहारः सर्वस्वं दद्यात् ॥ ५६ ॥[2]

अथ सव्रणं शिश्नं परिवास्याञ्जलावाधायोत्तराभिमुखोत्यैसतो [?] भवति । एभिः संबन्धं नः कुर्या [?] बन्धानामन्यतमेन वा तस्याप्येतदेव ॥ ५७ ॥

क्षीरक्षारलवणविक्रये कृच्छ्रद्वयं घृततिलतैलपत्रपुष्पमूलफलकेशगुरक्तवस्त्रपक्वान्नविक्रये, प्राजापत्यं चरेत् ॥ ५८ ॥

अशुचि वसुतिलोपजीवी चाकचाम्मीक [?] पूर्वारस्वर्णकारलेख्याकारगुणकगणिकान्नानि चाभोज्यानि ॥ ५९ ॥[3]

---

1. Viśvarūpa reads :—

सुवर्णस्तेयी मासं सवित्र्याष्टसहस्रमाज्याहुतीनां जुहुयात् । सर्वकृच्छ्रेण च पूतो भवति । III, 257.

Aparārka reads :—

सुवर्णस्तेयी मासं गायत्र्यष्टशतमाज्याहुतीः जुहुयात् प्रत्यहं त्रिरात्रमुपवासः । तप्तकृच्छ्रेण च पूतो भवति । अश्वमेधावभृथस्नानेन वा । III, 258

In another place :—

सुवर्णस्तेयी द्वादशरात्रं वायुभक्षो भवति । III, 258.

2. Aparārka reads :—

गुरुदारगामी संवत्सरं कण्टकशिखां परिष्वज्याधश्शायी त्रिषवणी स्वकर्माचक्षाणो भिक्षाहारः पूतो भवति अश्वमेधावभृथस्नानेन वा । III, 260.

Mādhava adopts Aparārka's reading with the following differences:—

गुरुदारगामी...कण्टकिनः शाखां...त्रिषवणो भैक्षा...भवतीति...वा.

Parāśara Mādhavīya, Vol. II pt. i, p., 338—9.

Madanapārijāta reads :—

अथ वा गुरुदाराभिगामी सवत्सरं कण्टाकिनीं शाखां परिष्वज्याधश्शायी त्रिषवणी भैक्षाहारः पूतो भवति । p. 840.

3. Aparārka reads :—

अभिशस्तपतितपौनर्भवभ्रूणहपुंश्चल्यशुचिशस्त्रकारतैलिकचाक्रिकध्वजिकसुवर्णकारालेख्यकपण्डकबन्धकीगणगाणिकान्नानि चाभोज्यानि । सौकरिव्याधनिषादवरुटचर्मकारा अभोज्यान्ना अप्रतिग्राह्याः तदशनप्रतिग्रहयोः चान्द्रायणं चरेत् । III, 286

Hemādri reads in the same way but omits तदशन- . . . चरत् ।

Pari. I, p. 477.

केशकीटयुतघ्रातवाससाहतश्च ॥ ६० ॥

चण्डालप्रेक्षितं ग्रासंसृष्टं चाभोज्यम् ॥ ६१ ॥

अथ तस्करकीकपाजविक्रयी पाषण्डगणगणिकाप्रेष्यपरिविण्णपरिवेत्तृअग्रेदिधिषुपर्याहितधेनुपुनर्भवान्धबधिरवारणक्लीबाभिशस्तावकीणिवार्धुषिककारुगायककूटसाक्षिस्तेयीवृषलीपत्यहुताशिनो विसृष्टानि [?] सोमविक्रयी कुण्डगोलकाशियन्त्रकास्कान्धवृषुदुकीटश्वश्वापदआपणीशिलोपजीवीवादित्रनृत्तगानोपजीवी संवत्सरमहापथिकाश्मकूटश्च विक्रमीणामेकनकप्राशने याचित [?] त्रिरात्रं त्रिषवणं चैके नैके दिवसाधिकः कृच्छ्रम् ॥ ६२ ॥

सलिलक्षीरघृतान्युष्णान्युपवासश्चेति तप्तकृच्छ्रम् ॥ ६३ ॥

वायुभक्षा द्वादशरात्रं वराकः गोमूत्रगोमयक्षीरदधिसर्पिःकुशोदकान्येकरात्रोपवासश्चेति सान्तपनम् ॥ ६४ ॥

संपरो [?] कृच्छ्रचन्द्रमसो गत्या [?] वृद्धयुच [?] ययोनश्चेति चान्द्रायणम् ॥

वयश्शरीरकर्मबलाद्यपेक्ष्य प्रायश्चित्तानि विदध्यात् ॥ ६६ ॥

एवं कुर्वाणो ब्राह्मणः सायुज्यं गच्छति सुमन्तोः सुगन्तोारिति ॥ ६७ ॥

॥ इति सुमन्तुस्मृतिः समाप्ता ॥

APPENDIX.

The following are some of the sūtras that are attributed to Sumantu but are not found in the ms. copy of Sumantu Dharmasūtra, now discovered. They are classified according to the subject they deal with :—

Ācāra.

लशुनपलाशकुम्भीनवश्राद्धसूतिकामधुमांसमूत्ररेतोऽमेध्यभक्षणे मूर्ध्नि संपातानवनयेदुपवासश्च । एतान्येव व्याधितस्य भिषक्क्रियायामनिषिद्धानि भवन्ति यानि चान्यान्येवंप्रकाराणि ॥[1]

Mādhava slightly differs from Aparārka thus :—

अभि...सुवर्णकारवर्मकारपङ्क्तिवर्धकिगणगणिकासौनिकव्याधनिषादरजकवुरुडचर्म..अप्रतिग्रह्या अयाज्याश्च ॥ Vol. I, pt. i, p. 175.

The same writer in another place reads :—

अभि...र्भवपुंश्चल्य...लेखकलैङ्गिकषण्डकबन्धकगणका...नि । सौनिकक्रव्यादनिषादबुरुडचर्म...ग्राह्याश्च अशनप्रति...रेत् ॥ Vol. II, pt. i, p. 384.

1. G. P. Ācārasāra, p. 436.

Āśauca.

मातुरेव सूतकम्, तां [१]स्पृशतां च, नेतरेषाम् ॥[1]

गर्भमासतुल्या दिवसा [२]गर्भस्रंसने सद्यः शौचं च[३] ॥[2]

Bhojyābhojyānnāḥ.

कृषिगोपालक्षेत्रिकपरिचारकनापितनिवेदितात्मानश्च भोज्यान्नाः ॥[3]

Apāṅkleya.

तस्करकितवाजपालगणगणिकाशूद्रप्रेष्यागम्यागामिपरिवेत्तृपरिवित्तिपर्याहितपर्याधातृपौनर्भवान्धबधिरचारणक्लीबावकीर्णिवार्धुषिकगरदायिकूटसाक्षिनास्तिकवृषलीपत्युपहता--दोत्सृष्टाग्निसोमविक्रय्यविक्रेयविक्रेतृपौस्तिककथककुण्डाशिकुण्डगोलकयन्त्रकारकाण्डपृष्ठ-दुश्चर्मचण्डविद्धशिश्नदेवलकषण्डारूढपतितप्रायोत्थितकुनखिकिलाशिश्यावदन्तवर्णकृशि-ल्पवादित्रनृत्यगीतालोपजीविमूल्यसांवत्सरिक महापथिकाश्मकुट्टकहीनातिरिक्ताङ्गाः विरागवाससश्च अपाङ्क्तेयाः[4] ॥

Prāyaścitta.

[४]नाततायिवधे [५]प्रायश्चित्तमन्यत्र गोब्राह्मणेभ्यः [६]गोब्राह्मणं यदा हन्यात् तदा प्रायश्चित्तं कुर्यात् [5]॥

अगम्यागमनस्त्रिविधचाण्डालसंपर्केषु कृच्छ्रत्रयं चरेत् ॥[6]

---

1. Hemādri Pariśeṣa Khaṇḍa, I, p. 486—7.
2. Smṛticandirkā Āśauca, p. 8.
   Parāśara Mādhavīya, Vol. I, pt. ii, p. 261. Hāralatā, p. 17.
3. Smṛticandrikā Āśauca, p. 3.

Kullūkabhaṭṭa has a slightly different reading :—

गर्भमासतुल्या...गर्भसंस्रवणे...वा भवति ॥

Manu. Vyā. V, 66.

१. स्पृशतः पितुश्च नेतरेषां Hāralatā, p. 17.

२. गर्भसंस्रावे Hāralatā, p. 68.

३. वा भवति Hāralatā, p. 68.

४. आततायिन्यदोषोऽन्यत्र is the reading in Madana Pārijāta, p. 785.

५. दोषोऽन्यत्र Mitramiśra on Yājñavalkya, p. 431.
Vīramitrodaya, Vyavahāraprakāśa, p. 167.

६. गोब्रा...कुर्यात् is found only in the Vīramtrodaya Vyavahāraprakāśa, p. 21.

4. Hemādri Pari. I, p. 787.
5. Viśvarūpa, III, 262.
6. Viśvarūpa, III, 254.

This is read in another place by Viśvarūpa himself thus :—

अगम्यागमने...चण्डालसङ्करे च...

अतोऽर्धमर्धं क्षत्रियवैश्यवधे व्याख्यातम् ॥[1]

पितृपत्न्यः सर्वा मारतरः तद्भ्रातरः मातुलाः तद्भगिन्यश्च मातृष्वसारः तथा भगिनीसपत्न्यश्च भगिन्यस्तदपत्यं च भागिनेयः । अतोऽन्यथा संस्कारकाणि कृत्वा याप्याः पतिताश्च भवन्ति ॥[2]

रागद्वेषादलभ्यमाने प्रायश्चित्ते जपहवनाध्ययनब्रह्मचर्यपरोभैक्षाशी दण्डी मेखली त्रिषवण्यधःशायी स्वयमेव महदशुभं पुनाति न ब्राह्मणस्य पतनमिच्छन्त्याचार्याः किल्बिष्युपगतः पातव्य इत्याङ्गिरसः ॥[3]

---

1. Viśvarūpa III, 254.
2. Viśvarūpa, III, 254.

The same quotation occurs in Haradatta's Ujjvalā, where the reading is :—

पितृपत्न्यः सर्वा मातरः तद्भ्रातरो मातुलाः तत्सुता मातुलसुता तस्मात्ता नोपयन्तव्याः ।

Hālāsyanātha Śāstrī, edn. p. 145.

The following variations are found in the reading of Mādhava :—

पितृपत्न्यः...मातृष्वसारः भगिनीसपत्न्यश्च...भागिनेयम्...सङ्करकारणानि कृत्वा अयाज्याः.

Parāśara Mādhavīya, Vol. II, Pt. i, p. 326

The same is found in a different manner in the Smṛticandrikā where the reading is :—

पितृपत्न्यः सर्वा मातरः तद्भ्रातरो मातुलाः तद्दुहितरश्च भगिन्यः तदपत्यानि भागिनेयानि अन्यथा सङ्करकारीणि स्युः ।

Saṁskārakāṇḍa, p. 188.

This extract is again found in the Parāġara Mādhavīya where the reading is :—

पितृपत्न्यः...मातुलाः तद्भगिन्यो मातृष्वसारः तद्दुहितरश्च... सङ्करकारिण्यः ॥

Parāśara Mādhvīya, Vol. I, Pt. ii, p. 64.

The reading in the Gadādhara Paddhati is :—

पितृपत्न्यः सर्वा मातरः तद्भ्रातरो मातुलाः तद्दुहितरश्च भगिन्यः तदपत्याः भागिनेयाः स्युः ताः सङ्करकारिणः तत्सकुल्यां नोद्वहेत् ।

Kālasāra, p. 224.

3. Viśvarūpa, III, 237.

Another reading is :—

अथ वा रागद्वेषादलभ्यमानेषु प्रायश्चित्तेषु यज्ञहवनाध्ययनब्रह्मचर्यपरो भिक्षाशी

स्त्रीरजतगोस्तैन्यं गोश्च गमनं नाशकं भूम्यनृतं क्षत्रियवैश्यगोघ्नता परिवित्तितावकीर्णिता प्रतिरूपकवृत्तिश्चेति उपपातकानि ॥[1]

साहचर्ये वा संवत्सरं प्राजापत्यं चरेत् ॥[2]

कन्यादातृयाजकानां द्वादशरात्रं सक्तुपानं ब्राह्मणतर्पणं च तां पुनर्भुवमित्याचक्षते भूयश्चैनामभिगच्छेत् ॥[3]

समानार्षेयीगमने कूष्माण्डैः होमः त्रिरात्रमुपवासश्च ॥[4]

श्वसृगालमहिषाजाविकखरकरभनकुलमार्जारमूषकप्लवबकपुरुषदष्टानामापोहिष्ठी–याभिः स्नानं प्राणायामत्रयं च ॥[5]

सुरापस्याघ्राय गन्धं सोमपः उदकमग्नः त्रिरघमर्षणं जप्त्वा घृतप्राशनमाचरेत् ॥[6]

शूद्रोच्छिष्टभोजने त्रिरात्रमघमर्षणं जपेत् ॥[7]

उद्बन्धनपाशछेदनवहनेषु मासं भैक्षमभक्षणं त्रिषवणं स्यात् ॥[8]

शूद्रयाजकः सर्वद्रव्यपरित्यागात् पूतो भवति ॥[9]

वानरसिंहमार्जारमण्डूकमूषकश्ववधे प्राजापत्यम् ॥[10]

चण्डालदर्शने सूर्यदर्शनम् । संभाषणे ब्राह्मणाभिव्याहारः । संस्पर्शने सचैलं स्नानमाचरेत् ॥[11]

स्त्रीबालमशकमक्षिकामार्जारमूषिकाच्छायासनशयनयानाम्बुविप्रुषो[१] नित्यं मेध्याः ॥[12]

दण्डी मेखली स्वयमेव संवत्सरेण महापातकादितत्परो व्यपोहति किल्बिषी न ब्राह्मणस्य पतनमिच्छन्त्याचार्याः ।

Madanapārijāta, p. 780.

1. Viśvarūpa, III, 236.
2. Aparārka, III, 260.
3. Aparārka, III, 268.
4. Aparārka, III, 268.
5. Aparārka, III, 276.
6. Aparārka, III, 289.
7. Aparārka, III, 289.
8. Aparārka, III, 292.
9. Aparārka, III, 289.
   Smṛticandirkā Āhnika. p, 462.
   Parāśara Mādhavīya, Vol. I, pt. i, p. 175.
10. Parāśara Mādhavīya, Vol. II, pt. i, p. 92.
11. Parāśara Mādhavīya, Vol. II, pt. i, p. 109.
12. Parāśara Mādhavīya, Vol. II, pt. i, p. 190.

१. छायापांसुविप्रुषो is the reading in Vīramitrodaya, Āhnikaprakāśa, p. 208.

मातृष्वसृपितृष्वसृस्नुषाभगिनीभागिनेयीगोचण्डालीनाम् अभिगमने तप्तकृच्छ्रम् ॥[1]

देवर्षिगोब्राह्मणाचार्यमातृपितृनरेन्द्राणां प्रतिषेधने आक्रोशने जिह्वां दहेत् । हिरण्यं दद्यात् ॥[2]

देवद्विजगुरून् हत्वाप्सु निमग्नोऽघमर्षणं सूक्तं त्रिरावर्तयत् मातरं भगिनीं गत्वा मातृस्वसारं स्नुषां सखीं चान्यद्वागम्यागमनं कृत्वाघमर्षणं वान्तर्जले त्रिरावर्तयेत् । एतस्मात् पूतो भवति ॥[3]

रेतोविण्मूत्रप्राशनं कृत्वा लशुनपलाण्डुगृञ्जनककुम्भीकादीनामन्येषां च अभक्ष्याणां भक्षणं कृत्वा हंसग्रामकुक्कुटश्वसृगालादिमांसभक्षणं कृत्वा ततः कण्ठमात्रमुदकमवतीर्य शुद्धवतीभिः प्राणायामं कृत्वा ब्रह्मणा व्याहृतीभिः करगमुदकं पीत्वा तदेतस्मात् पूतो भवति ॥[4]

Dravyaśuddhi.

मणिकनकरजतशङ्खशुक्त्युपलप्रवालानां प्रमार्जनं शुद्धिः । वस्त्रविदलरज्जुचर्मणामद्भिः प्रक्षालनम् । भूम्यस्थिकाष्ठानां तक्षणम् । मृत्पात्रलोहानां अग्निनोत्तापनम् । सीसत्रपुकांस्यताम्रायसकुद्दालानाम् उदकभस्मभ्यां त्रिः प्रमार्जनात् शुद्धिः । गोबालरज्ज्वा पुष्पफलानाम् । अन्यत्र शकुनोच्छिष्टेभ्यः । तेषामदोषः । श्वदष्टानां च मांसादीनां स्रुक्स्रुवाणामन्येषां च भाण्डानाम् उष्णेन वारिणा शौचम् । तैजसानां च भूजतुचर्मचीरवेणुफलवल्कानामद्भिः प्रक्षालनम् ॥[5]

स्त्रीबालमशकमक्षिकाछायासनशयानाम्बुविप्रुषो नित्यं मेध्याः । घृतकद्रूलागाराणाम् अत्याज्यानामदोषः ।[6]

---

1. Parāśara Mādhavīya, Vol. II, pt. i, p. 307.
   In a different place the same extract is cited with this difference :—

   मातृष्वसृ. . .चण्डालीगमनेषु तप्तकृच्छ्रत्रयं सान्तपनं च ॥

   Parāśara Mādhavīya, Vol. II, pt. i, p. 327

   Hemādri reads :—

   मातरं भगिनीं गत्वा मातृस्वसारं स्नुषां सखीं वान्यद्वागम्यागमनं कृत्वा अघमर्षणसूक्तमन्तर्जले त्रिरावर्त्य तदेतस्मात् पूतो भवति ।

   Hemādri Pari. I, p. 838.
2. Parāśara Mādhavīya, Vol. II, pt. i, p. 459.
3. Madanapārijāta, p. 971.
4. Madanapārijāta, p. 994-4.
5. Hemādri Pari. I. p. 814.
6. Hemādri Pari. I p. 545.

Sāpiṇḍya.

तथा ब्राह्मणानाम् एकपिण्डस्वधानाम् आदशमात् धर्मविच्छित्तिर्भवति आसप्तमात् रिक्थविच्छित्तिर्भवति आतृतीयात् स्वधाविच्छित्तिर्भवति ॥[1]

Śrāddha.

केशकीटक्षुतवचोऽभिहतं[१] श्वभिराघ्रातं प्रेक्षितं वा[२] दधि पर्युषितं पुनस्सिद्धं[३] चण्डालावेक्षितम् अभोज्यमन्यत्र हिरण्योदकैः स्पृष्टात् ॥[2]

बीजपूरकमाषं च न श्राद्धे दद्यात् ॥[3]

Vivāha.

कन्याकुत्सितान्यजातिकर्मशीला व्याध्युपहता परिणीता यद्यक्षतयोनिः स्यात् परित्यक्तव्या ॥[4]

त्रीनतीत्य मातृतः पञ्चातीत्य पितृतः ॥[5]

Vyavahāra.

स्वाम्यमात्मना संरक्षेत् । अमात्यान् संमानेन । वर्णान् रञ्जनेन । जनान् वर्णधर्मरञ्जनेन । दुर्गं धनधान्यादिसमृद्ध्या । कोशमुचितव्ययेन । मित्रं सत्यभाषणेन ॥[6]

---

1. Hāralatā, p. 99.
The Śuddhikaumudī reads this as follows :—
ब्राह्मणानामेकपिण्डस्वधानाम् आदशमात् सपिण्डतविच्छित्तिर्भवति ।
p. 51.
2. Smṛticandrikā Śrāddha, p. 229.
3. Hemādri Pari. I, p. 562, 903.
१. चोपहतं Vīramitrodaya, Āhnikaprakāśa, p. 517.
२. चा Vīramitrodaya, Āhnikaprakāśa, p. 517.
३. सिद्ध Vīramitrodaya, Āhnikaprakāśa, p. 514.
Another reading is :—
क्षुतवचोऽभिहतं श्वभिराघ्रातं प्रेक्षितं चान्नमभोज्यमन्यत्र हिरण्योदकैः स्पृष्टात् यस्यान्नस्य निकटे क्षुतं कृतं यस्य वा निकटे वचनमुच्चारितं तत् क्षुतवचोऽभिहतम् । प्रेक्षितं श्वभिरेव । एतेषूपघातेषु हिरण्यमिश्रजलसेकः शोधकः तदकृत्वा भोजने गायत्र्यष्टोत्तरशतजपः ।
G. P. Ācārasāra, p. 411.
4. Aparārka, I, 65.
5. G. P. Kālasāra, p. 224
6. Sarasvatīvilāsa, p. 46.

A NOTE ON A GREEK TEXT BEARING ON THE AŚVAMEDHA.

BY

K. A. NILAKANTA SASTRI, M. A.,

Professor of Indian History and Archæology, University of Madras.

In the *Journal Asiatique* Oct.-Decr. 1930, pp. 280-5, M. Roger Goosens draws attention to the only Greek text known to him on the Aśvamedha, which has not been noticed by other scholars like Negelein, the author of *Das Pferd im arischen Altertum* (Konigsberg, 1903), or P. E. Dumont-*L'Aśvamedha* (Paris, 1927). The text occurs in Philostratus' Life of *Apollonius of Tyana* and is translated as follows: "The Indians say that the king comes to the banks of this river (the Indus), in the season of the floods, and that he sacrifices to it bulls and horses, black (indeed the Indians value white less than the black, because, I think, of their own colour). After this sacrifice he throws in the river a measure of gold, similar to that which is used to measure corn. To what end the king does this, the Indians do not understand, but they (Appllonius of Tyana and his companion) suppose that this measure is thrown into the water for obtaining, it may be an abundance of the fruits of the earth which the cultivators measure, or the just proportion of the flood which, if it were very strong, would inundate the country."

Philostratus is not an unimpeachable authority and his 'romantic biography' contains many purely imaginary details. But his picture of India about 40 to 50 A. D. does not seem to be absolutely fanciful.

At first sight, it may seem that this passage on the Indus is inspired by what Herodotus says on the Persians offering on the banks of the Strymon a number of white horses to the river.[1] But Philostratus gives us details and looks for rationalistic explanations which recall, among other things, the explanatory comments

---

1. Herod. VII, 113.